अनाकुलो निःसन्देहः केतुचारः क्रियते ॥ * ॥

अथोदयास्तमयलक्षणं आह ।

"दर्शनमस्तमयो वा न गणितविधिनास्य शक्यते ज्ञातुम् । दिव्यान्तरीक्षभौमास्त्रिविधाः स्युः केतवो यस्मात्" ॥

अस्य केतोर्दर्शनं उदयः अस्तमयोऽदर्शनं गणितविधानेन ज्ञातुं न शक्यते । यस्मात् केतवस्त्रिविधास्त्रिप्रकाराः । दिवि आकाशे भवा दिव्याः । अन्तरीक्षे भवा आन्तरीक्षाः । ग्रहनक्षत्रस्थानं विहायान्यत्र आकाशे ये दृश्यन्ते ते आन्तरीक्षाः । भूमौ भवाः भौमाः । इति हेतोरुत्पातरूपत्वात् एषामुदयास्तमयौ न ज्ञायेते इति ॥ * ॥

अथ केतूनां दिव्यवर्ज्जितानां अन्येषां स्वरूपमाह ।

"अङ्गताशेऽनलरूपं यस्मिंस्तत्केतुरूपमेवोक्तम् । खद्योतपिशाचालयमणिरत्नादीन् परित्यज्य" ॥

अङ्गताशे अनलवर्ज्जिते यस्मिन् देशे अनलरूपमग्निरूपं दृश्यते यत् तदेव केतुरूपमुक्तम् । किन्तु खद्योत इन्द्रगोपकक्रमिविशेषः । पिशाचालयं यक्षस्थानम् । मणयश्चन्द्रकान्तप्रभृतयः । रत्नानि मरकतप्रभृतीनि । आदिग्रहणादन्यान्यपि काष्ठप्रभृतीनि तेजोरूपाणि एतान् त्यक्त्वा । यत एषां स्वभावादेवानलरूपमङ्गताशे दृश्यते अतो न तत् केतुरूपमिति ॥ * ॥

अथ दिव्यान्तरीक्षभौमानां केतूनां लक्षणमाह ।

"ध्वजशस्त्रभवनतरुतुरगकुञ्जराद्येष्वान्तरीक्षास्ते । दिव्या नक्षत्रस्था भौमाः स्युरतोऽन्यथा शिखिनः" ॥

ध्वजश्चिह्नम् । शस्त्रमायुधादि । भवन गृहम् । तरुर्वृक्षः । तुरगोऽश्वः । कुञ्जरो हस्ती । आदिग्रहणादन्येषु चतुष्पदेषु ये दृश्यन्ते ते आन्तरीक्षाः । दिव्या नक्षत्रस्थाः । अतोऽस्मादुक्तादन्यथा भूमौ ये दृश्यन्ते ते भौमाः । शिखिनः केतवः इति ॥ * ॥

अथ केतूनां संख्यानं मतान्तरेणाह ।

"शतमेकाधिकमेके सहस्रमपरे वदन्ति केतूनाम् । बहुरूपमेकमेव प्राह मुनिर्नारदः केतुम्" ॥

एके पराशरादयः एकाधिकं शतं केतूनां कथयन्ति । तथा च पराशरः । "शतमेकोत्तरं केतूनां भवन्ति तेषां षोड़श मृत्युनिश्वासजाः । द्वादशादित्यसम्भवाः । दश दक्षमखविलयने रुद्रक्रोधजाः । सप्त पैतामहाः । पञ्चदश वैरीद्दालिकस्य पुत्राः । सप्तदश मरीचिकश्यपजटाजाः । पञ्च च प्रजापतिसहजाः । त्रयो विभावसुजाः । धूमोद्भवश्चैकः । चतुर्दश मथ्यमानेऽमृते सोमेन सह सम्भूताः । एकस्तु शङ्करकोपजः" इति ॥ * ॥ अपरे गर्गादयः सहस्रं केतूनां वदन्ति ।

तथा च गर्गः ।

"अनित्योदयचाराणामशुभानाञ्च दर्शनम् । आगन्तूनां सहस्रं स्यात् ग्रहाणां सन्निबोध मे" ॥

बहुरूपमेकमेवेति नारदाख्यो मुनिरेकमेव केतुं बहुरूपं प्राह । तन्मते एक एव केतुस्तस्य बहूनि रूपाणि स एव दिव्यान्तरीक्षभौम इत्यर्थः ।

तथा च नारदः ।

"दिव्यान्तरीक्षभौमस्य एकः केतुः प्रकीर्त्तितः ।

शुभाशुभफलं लोके ददात्यस्तमयोदयैः" इति ॥ * ॥

एवं मतान्तराण्युक्त्वा स्वसिद्धान्तमाह ।

"यद्येको यदि बहवः किमनेन फलन्तु सर्व्वथा वाच्यम् । उदयास्तमयैः स्थानैः स्पर्शैराधूपनैर्वर्णैः"

यद्येक एव केतुः यदि वा बहवः केतवः किमनेन । सर्व्वथा तेषामुदयास्तमयैः स्थानैः स्पर्शैराधूपनैर्वर्णैश्च शुभाशुभं फलं पुनर्वक्तव्यम् । उदयः कस्यां दिश्युदितः । अस्तमयः कस्यामेवास्तमितः । स्थानं यथा कस्मिन्नाकाशभागे कस्य नक्षत्रस्य वा समीपे उदितोऽस्तमितश्च । स्पर्शनं कस्तेन ग्रहो नक्षत्रं वा स्पृष्टम् । आधूपनं कोऽपि शिखयाभिधूपितः । वर्णाः सितरक्तपीतकृष्णादिकाः । एवमादिभिस्तस्य फलं वाच्यं तस्मादेको बहवो वा भवन्तु का नः क्षतिरिति ॥ * ॥

अथ केतुचारे येषां केतूनामभिदृष्टानां कियन्तं कालं यावत् फलपाको भवति तेषां फलपाकनियमार्थमाह ।

"यावन्त्यहानि दृश्यो मासास्तावन्त एव फलपाकः । मासैरब्दांश्च वदेत् प्रथमात् पक्षत्रयात् परतः" ॥

दृश्यः केतुरिति सम्बध्यते । फलस्य पाकः फलपाकः । यः केतुर्यावन्त्यहानि दृश्यो भवति तस्य तावन्तो मासास्तस्य केतोस्तावतो मासान् फलपाको ब्रूयात् । यावत्सङ्ख्यकानि दिनानि दृष्टो भवति तत्तुल्यान् मासान् तस्य फलपाको वदेत् । मासैस्तु पुनरब्दान् संवत्सरान् ब्रूयात् । माससङ्ख्यादर्शने मासतुल्यानि वर्षाणि च वदेत् । यावत् सङ्ख्यान्मासान् दृश्यो भवति तावत्सङ्ख्यानि वर्षाणि तस्य फलपाको वदेत् । कस्मात् कालात् प्रभृतिरित्यत आह प्रथमात् पक्षत्रयात् परतः । सर्व्वेषां केतूनां दिनसाम्यत्वम् । यावन्ति दिनानि दृश्यः केतुस्तस्माद्दर्शनादूर्द्धं प्रथमं पक्षत्रयं पञ्चचत्वारिंशद्दिनानि यावत् निष्फलानि तस्मात् पक्षत्रयात् परतः तावतो मासान् फलपाकः । अथ मासान् दृश्यते तदा तस्मादेव दर्शनात् परतः पक्षत्रयमतिक्रम्य मासतुल्यानि वर्षाणि वदेत् । प्रथमात् पक्षत्रयात् परतः तत्र पक्षत्रयं यावद्दिनसङ्ख्या गृह्यते । पक्षत्रयादूर्द्धं यदा दृश्यते केतुस्तदा मासतुल्यानि वर्षाणि वदेत् । अत्र सन्देहव्युदासार्थं गर्गोक्तं नियमकमभिलिख्यते ।

तथा च गर्गः ।

"यावन्त्यहानि दृश्यः स्यात्तावन्मासान् फलं भवेत् । मासांस्तु यावद्दृश्येत तावतोऽब्दांस्तु वेत्तितान् ॥ त्रिपक्षात् परतः कर्म्म पचेत्तस्य शुभाशुभम् । यद्दिष्टमुदिते केतौ फलं नेहादिशेद्बुधः" ॥

तथा वृद्धगर्गः ।

"यावतो दिवसांस्तिष्ठेत्तावन्मासान् विनिर्दिशेत् । त्रिपक्षात् परतश्चापि कर्म्म केतोः प्रपद्यते ॥ तस्मात् कालात् परं ब्रूयात् फलमस्य शुभाशुभम् । यद्दिष्टमुदये केतोः फलं नेहादिशेद्बुधः" ॥

यद्येवं तदा द्वितीयव्याख्यानमत्र न घटते प्रथमव्याख्यानमेव न्याय्य इति । यथा प्रथमात् पक्षत्रयात् परतः दर्शनादूर्द्धं पक्षत्रयं यावन्निष्फलं

पक्षत्रयात् परतः फलपाकस्य कालसङ्ख्या प्रवर्त्तते तस्मादुक्तं यद्दिष्टमुदये केतोः फलं नेहादिशेद्बुधः इति । यदुक्तं मासैरब्दांश्च वदेत् तदेकदेशेनापि प्रतिमासमेकद्वित्रिदिनदर्शनेन माससङ्ख्या लभ्यत एवेत्यर्थः । सर्व्वथा किमनेनास्माकमसद्विकल्पेन । दिवसैः पक्षत्रयात् परतो मासान् वदेत् । मासैस्तस्मादेव पक्षत्रयात् परतोऽब्दान् वदेत् । मासात् परतो दिनाधिक्ये वृद्ध्यनुपातवशात् वाच्यम् । यथा यदि दिनत्रिंशता वर्षं लभ्यते तद्वृद्ध्या दिनैकेन मासैकमिति ।

तथा च समाससंहितायाम् ।

"केचित् केतुसहस्रं शतमेकसमन्वितं वदन्त्येके । नारदमतमेकोऽयं त्रिस्थानसमुद्भवो विविधरूपः ॥ दिव्या ग्रहर्क्षजातास्तीव्रफलकरा भौमाः । प्राणिध्वजादितुङ्गेषु चान्तरीक्षा न चात्यशुभाः ॥ उदयास्तमयाधूपनसंयोगाकारमार्गदिक्पातैः । फलानि दिवसैर्म्मासान् मासैस्तु वर्षाणि सन्दिशेत् केतोः" ॥ * ॥

अथ शुभस्य केतोर्लक्षणमाह ।

"ह्रस्वतनुः प्रसन्नः स्निग्ध ऋजुरचिरसंस्थितः शुक्लः । उदितो वाप्यभिदृष्टः सुभिक्षसौख्यावहः केतुः" ॥

ऋजुरकुटिलः । अचिरसंस्थितः शीघ्रमेवादर्शनं याति । शुक्लः श्वेतः । उदितो वाप्यभिदृष्टः अथवोदित एवाभिदृष्टस्तस्मिंस्तु उदितमात्रे यदि दृष्टिर्भवति तदा शुभः । अन्यथा अशुभः ॥

अशुभस्य केतोर्लक्षणमाह ।

"उक्तविपरीतरूपो न शुभकरो धूमकेतुरुत्पन्नः । इन्द्रायुधानुकारी विशेषतो द्वित्रिचूलो वा" ॥

ह्रस्वतनुः प्रसन्न इत्यस्मादुक्तात् यो विपरीतरूपः केतुरुत्पन्नः स धूमकेतुः । स च न शुभकरः पापं करोतीत्यर्थः । इन्द्रधनुःसदृशो न शुभकर एव । तथा द्विशिखस्त्रिशिखश्च विशेषतः पापफलदः ।

तथा च समाससंहितायाम् ।

"अचिरस्थितोऽभिदृष्टस्तनुः सितः स्निग्धमूर्त्तिरृजुरुदितः । ह्रस्वतनुः प्रसन्नः केतुर्लोकस्य भवाय ॥ न शुभो विपरीतो विशेषतः शक्रचापसंकाशः । द्वित्रिचतुश्चूलो वा दक्षिणसंस्थश्च मृत्युकरः" ॥ * ॥

अधुना केतुसहस्रलक्षणं विवक्षुस्तत्रादावेव रविजाः पञ्चविंशतिः केतवो भवन्ति । तेषां लक्षणमाह ।

"हारमणिहेमरूपाः किरणाख्याः पञ्चविंशतिः सशिखाः । प्रागपरदिशोर्दृश्या नृपतिविरोधावहा रविजाः" ॥ हारो मुक्ताहारः । मणयश्चन्द्रकान्तप्रभृतयः । हेम सुवर्णम् । तत्समानवर्णा ये केतवस्ते किरणाख्याः किरणसंज्ञाः । सशिखाः सचूलाः । ते च पञ्चविंशती रविजाः सूर्य्यसुताः प्रागपरयोश्च दिशोर्दृश्याः । प्राक् पूर्व्वस्यामपरस्यां पश्चिमायां दिशि दृश्यन्ते । एतेषां मध्यादेक एव दृश्यते न सर्व्वे युगपदिति । सर्व्वत्रेय परिभाषा । ते च नृपते राज्ञो विरोधप्रदाः अनिष्टा इत्यर्थः ।

तथा च गर्गः ।

"शुद्धस्फटिकसंकाशा मृणालरजतप्रभाः ।